नित्यं संभ्रमजृम्भिता नटति यज्जिह्वाङ्गणे भारती
जायन्ते कविपुंगवास्तनुभृतो यद्वक्त्रनिर्वर्णनात् ।
भोजक्षोणिभुजामुना विरचितश्चम्पूप्रबन्धोऽधुना
व्याख्यां तस्य करोमि मञ्जुलतरां साहित्यमञ्जूषिकाम् ॥
व्याकुर्वन्ति निबद्धगौरवभयान्नैव स्फुटं युक्तिभि-
र्ये तेऽध्येतृजनप्रतारणपराः का नैपुणी वा ततः ।
वैखर्या वचसां कवीशहृदयं प्रख्यापयन्नन्वय-
द्वारैवाहमिहाखिलं प्रविवृणोम्युक्तिप्रजोज्जृम्भितम् ॥

अथ खलु तत्रभवान्विचित्रसरसकविताकल्पलतामञ्जर्यामोदिताशेषविबुधसमाजोऽनवद्यनिखिलविद्याभिज्ञः सर्वज्ञसार्वभौमो भोजनामा महाराजः समस्तसद्गुणमणिगणाभिरामस्य तारकब्रह्मरूपिणस्तत्रभवतः श्रीरामस्य चरितानुवर्णनं निःश्रेयसनिदानं निजान्तरङ्गे निर्वर्ण्य 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥' इत्याद्यलंकारवचनप्रामाण्यात्, काव्यस्यानेकश्रेयःसाधनतां 'काव्यालापांश्च वर्जयेत्' इति निषेधस्यासत्काव्यविषयतां च पश्यन्, सकलकल्याणपरायणं श्रीरामायणं चम्पूप्रबन्धात्मना चिकीर्षुः, चिकीर्षितानन्तरायपरिसमाप्तिप्रचयगमनलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याचार्यदण्डिवाक्यादाशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च तत्रादौ लक्ष्मीशब्दपूर्वकमाशिषं प्रयुङ्क्ते—

**लक्ष्मीं तनोतु नि[1]तरामितरानपेक्ष-**
**मङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम् ।**
**हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं**
**विघ्नाद्रिभेदशतधारधुरंधरं नः ॥ १ ॥**

**लक्ष्मीमिति** । आदौ लक्ष्मीशब्दप्रयोगाद्वर्णगणादिशुद्धेरभ्युच्छ्रयः । तदुक्तम्—'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥' इति । निगमा वेदास्त एव शाखिनो वृक्षाः । 'वृक्षो महीरुहः शाखी' इत्यमरः । व्रीह्यादित्वादिनिः । तेषां शिखा उपनिषदः । ता एव शिखा अग्राणीति श्लिष्टरूपकम् । मौलयश्च प्रतीयन्ते । तासां प्रवालं नवपल्लवम् । वेदान्तवेद्यमित्यर्थः । 'शिखा ज्वालाकेकिमौल्योः शिखा शाखाग्रमौलिषु' इति वैजयन्ती । 'प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे' इति शब्दार्णवे । अम्बुनि रोहतीत्यम्बुरुहं पद्मं तस्य यो डम्बरः सौभाग्यातिशयसंरम्भस्तस्य चौर्येऽपहरणे । ब्राह्मणादित्वात्ष्यञ् । निघ्नमायत्तम् । अम्बुरुहसौभाग्यापहारीत्यर्थः । 'अधीनो निघ्न आयत्तः' इत्यमरः । अत एव सादृश्यपर्यवसानादुपमा । डम्बरेत्यत्र दम्यन्ते भीरवोऽनेनेति डम्बरः । 'दमु उपशमे' । औणादिकत्वाद्वरप्रत्ययः, पृषोदरादित्वाद्वर्णव्यत्ययश्च । सुबोधिनीकारस्तु—'डम्ब विक्षेपे' इति वान्तो

---

१. 'सुतराम्' इति पाठः.

धातुरस्तीत्याह । तन्मते डम्बं विक्षेपं रातीति डम्बरः । 'आडम्बरोऽस्त्री संरम्भः' इत्यमरशेषश्च । विहन्यन्त एभिरिति विघ्नाः प्रत्यूहाः । 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः । 'घञर्थे कविधानम्' इति कप्रत्ययः । त एवाद्रयः पर्वतास्तेषां भेदे विदारणे शतधारधुरंधरं वज्रायुधसमानसारम् । अशेषविघ्नविनाशकमित्यर्थः । धूरेव धुरा । 'आपं चैव हलन्तानाम्' इति वचनादाप् । तां धारयतीति धुरंधरम् । 'संज्ञायां भृतॄवृजि—' इत्यादिनाण्प्रत्ययः । 'खित्यनव्ययस्य' इति ह्रस्वः । 'अरुर्द्विषत्—' इत्यादिना मुमागमः । हेरम्बस्येदं हैरम्बं वैनायकम् । 'तस्येदम्' इत्यण् । अङ्घ्रिद्वयं चरणयुग्मम् । इतरेषु न विद्यतेऽपेक्षा यस्मिन्कर्मणि तद्यथा भवति तथेतरानपेक्षम् । भजनीयान्तरनिरपेक्षमित्यर्थः । इदं क्रियाविशेषणम् । यद्यङ्घ्रिद्वयविशेषणं तदा सहकार्यन्तरमनपेक्ष्य स्वातन्त्र्येणैव सकलसेवकजनाभीप्सितदानसमर्थमित्यर्थः । नितरामतिशयेन । 'किमेत्तिङव्यय—' इत्यादिना आम्प्रत्ययः । नोऽस्माकं लक्ष्मीमशेषाभिलषितार्थसंपत्तिं तनोतु करोतु । संपादयत्वित्यर्थः । तनोतेः 'आशिषि लिङ्लोटौ' इत्याशीरर्थे लोट् । 'शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिति कथ्यते' इति शाश्वतः । अत्राशीरलंकारः—'आशीर्नामाभिलषितवस्तुनः शासनं मतम्' इति लक्षणात् । अयं चोक्तोपमारूपकविशेषाभ्यां तिलतण्डुलवत्परस्परनैरपेक्ष्यात्संसृज्यते । तथा नितरामितरेत्यादिव्यञ्जनयुग्मानां तकाररेफखकारादीनां केवलानां चासकृदावृत्त्या वृत्त्यनुप्रासः शब्दालंकारः । तदुक्तं विद्यानाथेन—'एकद्विप्रभृतीनां तु व्यञ्जनानां यदा भवेत् । आवृत्तिर्यत्र संदर्भे वृत्त्यनुप्रास इष्यते ॥' इति । अयमेवालंकारः प्रायशो भोजराजोक्तिष्वनुसंधेयः । विशेषं तु वक्ष्यामः । आदौ शुदेवताक[illegible] ोस्तगणस्य प्रयोगाच्छुभलाभः सूच्यते । तदुक्तम्—'तो यौरन्त्यलघुः शु[illegible] । लकारस्य भूलाद्बीजप्रचयगमनसिद्धिः । प्रायेणात्र द्राक्षापाकः—'द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रसः' इति लक्षणात् । एतदादिश्लोकपञ्चकं वसन्ततिलकावृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति केदारलक्षणात् ॥

इदानीं तावत् 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते' इत्यादिभगवद्भाष्यकारवचनं प्रमाणयन्, शिष्टाचारपरिप्राप्तं विशिष्टदेवताब्राह्मणनमस्काररूपं मङ्गलं निबध्नाति—

> उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चे-
> त्तस्य प्रमा च वचनैः कृतकेतरैश्चेत् ।
> तेषां प्रकाशनदशा च महीसुरैश्चे-
> त्तानन्तरेण निपतेत्क्व नु मत्प्रणामः ॥ २ ॥

**उच्चैरिति** । जगति । जगत्स्वित्यर्थः । उच्चैरुन्नता गतिर्गन्तव्यदेशः । स्वर्गाद्युन्नतस्थानमित्यर्थः । 'देशे प्राप्ये गतिः' इति वैजयन्ती । धर्मतो ज्योतिष्टोमादिधर्मात् । पञ्चम्यास्तसिः । सिद्ध्यति चेन्निष्पन्ना भवति यदि । सिद्ध्यतीति पदं सर्वत्र संबध्यते । तस्य धर्मस्य प्रमा यथार्थानुभवश्च । स्वर्गादिफलसाधनत्वज्ञानमिति यावत् । प्रमाकरणं